"यदुष औच्छः प्रथमा विभानाम् ।"
"विभानां विभासकानां अहर्नक्षत्रादीनाम् ।"
इति तद्भाष्ये सायणः ।)

विभाकरः, पुं, (वि+भा+कृ+"दिवाविभानिशेति ।" ३ । २ । २१ । इति टः । ) सूर्य्यः । (यथा, साहित्यदर्पणे । १० । अर्थश्लेषे ।
"अच्छया भूयसाविष्टो विभाति च विभाकरः ।")
अर्कवृक्षः । चित्रकवृक्षः । इत्यमरः । अग्निः । इति मेदिनी । रे, २६७ ॥ (त्रि, प्रकाशशीलः ।)

विभागः, पुं, (वि+भज+घञ् । ) भागः । अस्य पर्य्यायः अंशशब्दे द्रष्टव्यः । अस्य लक्षणं यथा ।
"एकदेशोपात्तस्यैव भूहिरण्यादावुत्पन्नस्य स्वत्वस्य विनिगमनाप्रमाणाभावेन वैशेषिकव्यवहारानर्हतया अव्यवस्थितस्य गुटिकापातादिना व्यञ्जनं विभागः । विशेषेण भजनं स्वत्वज्ञापनं वा विभागः ।" इति दायभागः ॥
अपि च ।
"विभागोऽर्थस्य पित्र्यस्य पुत्त्रैर्यत्र प्रकल्प्यते ।
दायभाग इति प्रोक्तं तद्विवादपदं बुधैः ॥"
इति नारदवचनम् ॥
पूर्व्वस्वामिस्वत्वोपरमे सम्बन्धाविशेषात् सम्बन्धिनां सर्व्वधनप्रसृतस्य स्वत्वस्य गुटिकापातादिना प्रादेशिकस्वत्वव्यवस्थापनं विभागः ॥ * ॥
अपि च । कात्यायनः ।
"जीवद्विभागे तु पिता नैकं पुत्त्रं विशेषयेत् ।
निर्भाजयेत् न चैवैकमकस्मात् कारणं विना ॥"
उक्तकारणशून्ये तु नारदः ।
"व्याधितः कुपितश्चैव विषयासक्तचेतनः ।
अयथाशास्त्रकारी च न विभागे पिता प्रभुः ॥"
निवृत्तरजस्कायामेव मातरि पितामहधनविभागमाह बृहस्पतिः ।
"पित्रोरभावे भ्रातॄणां विभागः संप्रदर्शितः ।
मातुर्निवृत्ते रजसि जीवतोरपि शस्यते ॥"
अन्यच्च । याज्ञवल्क्यः ।
"विभागञ्चेत् पिता कुर्य्यादिच्छया विभजेत् सुतान् ।
ज्येष्ठं वा श्रेष्ठभागेन सर्व्वे वा स्युः समांशिनः ॥"
अपि च देवलः ।
"अविभक्तविभक्तानां कुल्यानां वसतां सह ।
भूयो दायविभागः स्यादाचतुर्थादिति स्थितिः ॥"
विष्णुः । पितृविभक्ता विभागानन्तरोत्पन्नस्य विभागं दद्युरिति ।
"गोत्रभागविभागार्थे सन्देहे समुपस्थिते ।
गोत्रजैरपरिज्ञाते कुलं साक्षित्वमर्हति ॥"
इति शङ्खवचनम् । इति दायतत्त्वम् ॥
सामान्यधर्म्मावच्छिन्नानामेव बहूनां परस्परविरुद्धतद्व्याप्यधर्म्मप्रकारेण प्रतिपादनं हि विभागः । इति श्राद्धविवेकटीकायां श्रीकृष्णतर्कालङ्कारः ॥ * ॥ न्यायमते चतुर्व्विंशतिगुणान्तर्गतगुणविशेषः । स त्रिविधः । यथा,—
"शब्दाहेतुर्द्वितीयः स्यात् विभागोऽपि त्रिधा भवेत् ।
एककर्म्मोद्भवस्त्वाद्यो द्वयकर्म्मोद्भवः परः ॥
विभागजस्तृतीयः स्यात्तृतीयोऽपि द्विधा भवेत् ।
हेतुमात्रविभागोत्थहेत्वहेतुविभागजः ॥"
इति भाषापरिच्छेदः ॥ * ॥
विभक्तप्रत्ययकारणं विभागं निरूपयति विभाग इति एककर्म्मेति । उदाहरणन्तु । श्येनशैलविभागादिकं पूर्व्ववत् बोध्यं तृतीयो विभागजः कारणमात्रविभागजन्यः कारणाकारणविभागजन्यश्चेति आद्यस्तावत् यत्र कपालकर्म्म ततः कपालद्वयविभागस्ततो घटारम्भकसंयोगनाशस्ततो घटनाशः ततस्तेन एककपालविभागेन सकर्म्मणः कपालस्य देशान्तरविभागो जन्यते तत उत्तरदेशसंयोगः ततः कर्म्मनाश इति । न च तेन कर्म्मणैव कथं देशान्तरविभागो न जन्यते इति वाच्यं एकस्य कर्म्मण आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्यानारम्भकसंयोगप्रतिबन्धिविभागजनकत्वविरोधात् अन्यथा विकसत्कमलकुड्मलभङ्गप्रसङ्गात् तस्माद्यदीदं अनारम्भकसंयोगप्रतिद्वन्द्विविभागं जनयेत्तदा आरम्भकसंयोगप्रतिबन्धिविभागं न जनयेत् । न च कारणविभागेनैव द्रव्यनाशात् पूर्व्वं कुतो देशान्तरविभागो न जन्यते इति वाच्यं आरम्भकसंयोगप्रतिबन्धिविभागवतः अवयवस्य सति द्रव्ये देशान्तरविभागासम्भवात् यत्र हस्तक्रियया हस्ततरुविभागः ततः शरीरेऽपि विभक्तप्रत्ययो भवति तत्र च शरीरतरुविभागे हस्तक्रिया न कारणं व्यधिकरणत्वात् शरीरे तु क्रिया नास्ति अवयविकर्म्मणो यावदवयवकर्म्मनियतत्वात् । अतस्तत्र कारणाकारणविभागेन कार्य्याकार्य्यविभागो जन्यते इति अतएव विभागो गुणान्तरं अन्यथा शरीरे विभक्ताविभक्तप्रत्ययो न स्यात् अतः संयोगनाशेन विभागो नान्यथासिद्धो भवति । इति सिद्धान्तमुक्तावली ॥ ("सामान्यधर्म्मावच्छिन्नानामेव वस्तूनां परस्परविरुद्धतद्व्याप्यधर्म्मप्रकारेण प्रतिपादनम् ॥" यथा द्रव्यत्वधर्म्मावच्छिन्नानां क्षित्यादीनां परस्परविरुद्धेन क्षितित्वजलत्वादिना अथ द्रव्यत्वव्याप्येन विशेषेण तथा प्रतिपादनं नवधा द्रव्यविभागः ॥ यागः । यथा, ऋग्वेदे । ५ । ७७ । ४ ।
"यो भूयिष्ठं नासत्याभ्यां विवेष च निष्ठं पित्व ररते विभागे ।"
"यो यजमानो विभागे हविर्व्विभागवति यागे ।"
इति तद्भाष्ये सायणः ॥")

विभाज्यं, त्रि, विभजनीयम् । विभागार्हम् । यथा,
"कुटुम्बं बिभृयाद्भ्रातुर्यो विद्यामधिगच्छतः ।" — 
"कुले विनीतविद्यानां भ्रातॄणां पितृतोऽपि वा ।
शौर्य्यप्राप्तन्तु यद्वित्तं विभाज्यं तद्बृहस्पतिः ॥
शिल्पेष्वपि हि धर्म्मोऽयं मूल्याद्यच्चाधिकं भवेत् ।
परं निरस्य यल्लब्धं विद्यया द्यूतपूर्व्वकम् ।
विद्याधनन्तु तद्विद्यान्न विभाज्यं बृहस्पतिः ॥"
तथा ।
"शौर्य्यभार्य्याधने चोभे यच्च विद्याधनं भवेत् ।
त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः ॥"
इति दायतत्त्वम् ॥

विभाण्डकः, पुं, मुनिविशेषः । स तु ऋष्यशृङ्गपिता । इति रामायणम् ॥ (यथा, महाभारते । ३ । ११२ । २१ ।
"सोऽपश्यदासीनमुपेत्य पुत्त्रं
ध्यायन्तमेकं विपरीतचित्तम् ।
विनिश्वसन्तं मुहुरूर्द्ध्वदृष्टिं
विभाण्डकः पुत्त्रमुवाच दीनम् ॥")

विभाण्डी, स्त्री, आवर्त्तकीलता । इति राजनिर्घण्टः ॥

विभातं, क्ली, (वि+भा+क्तः । ) प्रत्यूषः । इति शब्दरत्नावली ॥

विभावः, पुं, (विशेषेण भावयति रसं सामाजिकानिति । वि+भावि+अच् । ) परिचयः । रसस्योद्दीपनादिः । इति मेदिनी । तल्लक्षणादिर्यथा,—
"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम् ॥"
विभावादयो वक्ष्यन्ते । विभावादीनां यथासंख्यं कारणकार्य्यसहकारित्वे कथं त्रयाणामपि रसोद्बोधे कारणत्वमित्युच्यते ।
"कारणकार्य्यसञ्चारिरूपा अपि हि लोकतः ।
रसोद्बोधे विभावाद्याः कारणान्येव ते मताः ॥
सद्भावश्च विभावादेर्द्वयोरेकस्य वा भवेत् ।
झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते ॥
विभावादिपरामर्शविषयत्वात् सचेतसाम् ।
परानन्दमयत्वेन संवेद्यत्वादपि स्फुटम् ॥" * ॥
"अथ के ते विभावानुभावव्यभिचारिण इत्यपेक्षायां विभावमाह ।
रत्याद्युद्बोधका लोके विभावाः काव्यनाट्ययोः ।
ये हि लोके रामादिगतरतिहासादीनाम् उद्बोधकारणानि सीतादयस्त एव काव्ये नाट्ये च निवेशिताः सन्तो विभाव्यन्ते आस्वादाङ्कुरप्रादुर्भावयोग्याः क्रियन्ते सामाजिकरत्यादिभावा एभिरिति विभावा उच्यन्ते ।
आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ ।"
इति साहित्यदर्पणे ३ परिच्छेदे ।
(विविधप्रकारेण प्रकाशयति, त्रि । यथा, ऋग्वेदे । १ । १४८ । १ ।
"न चित्रं वपुषि विभावम् ।"
"विभावं विविधप्रकाशवन्तम् ।" इति तद्भाष्ये सायणः ॥ )

विभावनं, क्ली, } विभावना, स्त्री, } (विभावयति कारणं विना कार्य्योत्पत्तिं चिन्तयति पण्डितमिति । वि+भावि+ल्युः । युच् वा । ) अलङ्कारविशेषः । स च विनाकारणं उपनिबध्यमानोऽपि कार्य्योदयरूपः । यथा,—
"विभावना विना हेतुं कार्य्योत्पत्तिर्यदुच्यते ।